# ॥ द्रौपदी कृत श्रीकृष्ण स्तुति ॥

शङ्खचक्रगदापाणे! द्वरकानिलयाच्युत!

गोविन्द! पुण्डरीकाक्ष!रक्ष मां शरणागताम्॥

हा कृष्ण! द्वारकावासिन्! क्वासि यादवनन्दन!

इमामवस्थां सम्प्राप्तां अनाथां किमुपेक्षसे ॥

गोविन्द! द्वारकावासिन् कृष्ण! गोपीजनप्रिय!

कौरवैः परिभूतां मां किं न जानासि केशव! ॥

हे नाथ! हे रमानाथ! व्रजनाथार्तिनाशन!

कौरवार्णवमग्नां मामुद्धरस्व जनार्दन! ॥

कृष्ण! कृष्ण! महायोगिन् विश्वात्मन्! विश्वभावन!

प्रपन्नां पाहि गोविन्द! कुरुमध्येऽवसीदतीम्॥

नीलोत्पलदलश्याम! पद्मगर्भारुणेक्षण!

पीतांबरपरीधान! लसत्कौस्तुभभूषण! ॥

त्वमादिरन्तो भूतानां त्वमेव च परा गतिः।

विश्वात्मन्! विश्वजनक! विश्वहर्तः प्रभोऽव्यय! ॥

प्रपन्नपाल! गोपाल! प्रजापाल! परात्पर!

आकूतीनां च चित्तीनां प्रवर्तक नतास्मि ते ॥

Paramsoul.com

परमSoul